**अनाधृष्य** त्रि० आ+धृष–कर्म्मणि क्यप् न आधृष्यः न०त० । अनभिभवनीये "अनाधृष्यं वृषभं तुविष्मिन्द्रमिति" ऋ० ४, १८,१०,"तव देवैरनाधृष्यमिति" रामा० ।

**अनानुद** त्रि० अनुददाति अनु+दा–क न०त० पृ० दीर्घः । समानदातृशून्ये अतुल्यदातरि । "अनानुदो वृषभोदोधत" इति ऋ० २,२१,४, "प्रभूतधनदानेन अन्यः समानो दाता नास्तीति" भा० ।

**अनापि** त्रि० आप्यते आप–कर्म्मणि इन् आपिराप्तो बन्धुश्च न०ब० । आप्तशून्ये । "अनापिरज्ञा असजात्यामतिरिति" ऋ० १०,३९,६, "अनापिरबन्धुरिति" भा० 'अभ्रातृव्यो अना त्वमनापिरिन्द्र" इति ऋ० ८,२१,१३।

**अनाप्त** त्रि० आप्तो बन्धुः यथार्थज्ञानवान्, प्राप्तश्च, न०त० । बन्धुभिन्ने, अप्राप्ते, "यश्चानाप्तः सूर्य्यस्येव ऋ०१,१००,२, "अनाप्तः परैरप्राप्तः" इति भा० । यथार्थनिश्चयवद्भिन्ने "युग्यस्थाः प्राजकेऽनाप्ते सर्वे दण्ड्याः शतं शतमिति" मनुः ।

**अनाभयिन्** त्रि० आबिभेति आ+भी–उणा० इनि न०त० । सम्यग्भीतभिन्ने । "अनाभयिन्नरिमा ते" ऋ०८,२,१, ।

**अनाभू** त्रि० आभिमुख्येन भवति आभूः स्तोता न०त० । स्तोतृभिन्ने आभिमुख्याप्राप्ते च । "इन्द्रःअयथन्ननाभुव" इति ऋ० १,५१,९, ।

**अनामन्** न० अननमनः अनं जीवनम् अमयति रुजति अम–कनिन् । अर्शोरोगे । नास्ति नामास्य नामशून्ये मलमासे पु० तस्य वैदिककर्म्मानर्हतयाऽनामत्वात्तत्त्वम् । नामशून्ये त्रि० अनामिकायामपि पु० शब्दरत्ना० । स्वार्थे कन् । तत्रार्थे ।

**अनामय** पु० अम–घञ् आमं तापं यात्यनेन या–क आमयो रोगः न०त० । रोगाभावे आरोग्ये । "ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयमिति" मनुः । न०५ब०। बाह्याभ्यन्तरपीड़ानिवारके विष्णौ पु० "पुण्यकीर्त्तिरनामय" इति विष्णुस० । रोगशून्ये त्रि० । "जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयमिति" गीता ।

**अनामयित्नु** अम–णिच्–बा० इत्नुच् न०त० । व्ययकभिन्ने "हस्ताभ्यामनामयित्नुभ्यामिति" ऋ० १०,१३७,७, ।

**अनामा** स्त्री अङ्गुष्ठः शिरश्छेदनसाधनतया ग्रहणायोग्यत्वात् नास्ति नाम ग्रहणयोग्यं यस्याः, नास्ति अङ्गुष्ठतर्जन्यादिवत् विशेषनामास्य वा मनन्तत्वात् डाप् । स्वनामप्रसिद्धायां मध्यमाकनिष्ठयोः मध्यगायामङ्गुल्याम् । स्वार्थे कन् । अनामिकाप्यत्र । तया हि शिवेन ब्रह्मशिरश्छिन्नमिति पुराणे प्रसिद्धम् तेन तस्या अपवित्रजातीयता अतएव तस्याः पवित्रीकरणार्थं यज्ञादौ पवित्रनामककुशधारणं तत्र क्रियते । "अनामिकाधृता दर्भा ह्येकानामिकयापि वा, द्वाभ्यामनामिकाभ्यां तु धार्य्ये दर्भपवित्रके" इति छन्दो०प० ।

**अनाम्नृण** त्रि० आम्नृणाति हिनस्ति आ+म्नृण–क न०ब० । हिंसकरहिते । "अनाम्नृणः कुविदादस्य ऋ० १,३३१, ।

**अनायत्त** त्रि० न आयत्तः । अवशे अनधीने । "एतावज्जन्मसाकल्यं यदनायत्तवृत्तितेति" हितो० ।

**अनायन** न० न आयनं चालनम् यत्र । एकान्ते हेम० एकान्तानायनमित्येकं नामेति केचित् ।

**अनायास** पु० आ–यस घञ् अल्पार्थे न०त० । प्रयत्नाभावे, अल्पप्रयासे, अक्लेशे च । "शरीरं पीड्यते येन शुभेनाप्यशुभेन वा । अत्यन्तं तन्न कुर्वीत अनायासः स उच्यते" अत्रि० । ब० । प्रयत्नशून्ये त्रि० । "समाप्येऽकस्मिन्ननायासे कर्मणि सहायेन भवता भवितव्यमिति" शकु० ।

**अनायासकृत** न० अनायासेन अल्पप्रयत्नेन कृतं न०त० । अल्पायासेन साध्ये फाण्टे क्वाथे ।

**अनायुष्य** न० आयुषे हितम् आयुस्+यत् न०त० । आयुरहितकरे अतिभोजनादौ । "अनारोग्यमनायुष्यमस्वर्ग्यञ्चातिभोजनम्" इति "नहीदृशमनायुष्यं लोके किञ्चन विद्यते यादृशं पुरुषस्येव परदारोपसेवनमिति" च मनुः । "तत्र प्रथमदिवसे ऋतुमत्यां मैथुनगमनमनायुष्यं पुंसामिति" सुश्रुतम् एवमन्यान्यपि बहूनि अनायुष्याणि तत्र स्थाने स्थाने दर्शितानि । तत एव तानि बोध्यानि ।

**अनारत** न० आ+रम–क्त आरतं विरतिः अत्यन्ताभावे न०त०। सन्तते, अविरामे अविच्छेदे च । "अनारतं तेन पदेषु लम्भिता" इति भार० । ब० । तद्वति त्रि० ।

**अनारभ्य** अव्य० आ+रभ–ल्यप् न आरभ्य । किञ्चिदनधिकृत्येत्यर्थे । "अनारभ्याधीतत्वादिति" मीमांसा । न आरभ्यः न०त० । आरभ्यभिन्ने त्रि० । अनारभ्यत्वादिति का० १,८,३, 'नैवायमारम्भणीऽर्य्य" इति व्याख्या ।"अनारभ्यत्वाच्चेति" इति कात्या० २०,८,२९, ।"तस्मादनारभ्योऽयमर्थ" इति व्याख्या ।

**अनारभ्याधीत** त्रि० न आरभ्य किञ्चित् अधीतः । किञ्चिदनधिकृत्य अधीते, येषां मन्त्राणां कर्म्मविशेषे विनियोगो नोक्तस्तेषां मन्त्राणामनारभ्याधीतत्वात् ब्रह्मयज्ञे एव विनियोग इति मीमांसायां स्थिरीकृतम् । 'सामान्येन तु विनियोगो यद्यपि ब्रह्मयज्ञविशेष" इति ऋ०भा० माधवः ।